# १ प्रथमः परिच्छेदः॥: प्रमाणसिद्धिः

1b/MA

विमुक्तावरणक्लेशं दीप्ताखिलगुणश्रियं।
स्वैकवेद्यात्मसम्पत्तिं नमस्यामि महामुनिम्॥

स्वयमपि कृतिनां महद्भिरन्यैरपि गमितो बहुविस्तरैर्न्न योयम्।
तदपि च सुगमो न मद्विधानामिति विवृतिच्छलतः करोमि चिन्ताम्॥

अहमपि न निजैकलाभलुब्धो न च परकृत्यरसाभिलाषमुक्तः।
फलति पुनरियं परार्थवाञ्छाव्रततिरभीष्टफलानि पुण्यभाजाम्॥

### क. नमस्कारश्लोकः

शास्त्रादावविघ्नेन तत्समाप्त्यर्थं भगवति प्रसादजनने श्रोतृजनानुग्रहार्थश्च स्तुतिपूर्वकमाचार्यो नमस्कारश्लोकमाह।

**विधूतकल्पनाजालगम्भीरोदारमूर्तये।**
**नमः समन्तभद्राय समन्तस्फरणत्विषे॥ १॥**

विधूतं विध्वस्तं अनुत्पत्तिकधर्मतामापादितं "कल्पना" ग्राह्यग्राहकाध्यारोपः सैव "जालं" बन्धनहेतुत्वात् यासां ता विधूतकल्पनाजालाः। एतेन धर्मकाय उक्तः। द्वयशून्यताया धर्मधातुत्वात् (।) तदधिगमस्य धर्मकायत्वात्। गम्भीराश्च खड्ग श्रावकाद्यविषयत्वात्। 002/s
उदाराश्च सकलज्ञेयसत्वार्थव्यापनादिति "गम्भीरोदाराः"। आभ्यां साम्भोगिकनैर्म्माणिककायावुक्तौ तयोरेव स्वरूपत्वात्। विधूतकल्पनाजाला गम्भीरोदारा "मूर्त्तयो" यस्य स "विधूतकल्पनाजालगम्भोरोदारमर्त्तिः" (।) एतेन स्वार्थसम्पदुक्ता त्रिकायलक्षणत्वात्तस्याः।

"समन्तं" निरवशेषं भद्रं कल्याणं परार्थसम्पत्सम्भारलक्षणं यस्मादसौ "समन्तभद्रः" (।) अनया भगवन्नामव्युत्पत्त्या परार्थसम्पदभिहिता। समन्ततः स्फरन्तीति समन्तस्फरण्यः त्विषः ताव (त्) त्विषो देशना यस्य स "समन्तस्फरणत्विट्" वस्तुतत्त्वावभासनोपायता च त्विड्देशनयोः साधर्म्यं (।) अनेन परार्थसम्पदुपायो दर्शितः। देशनाद्वारेण भगवता जगदर्थकरणात्। एतेन स्तुतिरुक्ता असाधारणानां स्वपरार्थसम्पत्तितदुपायानामुपदर्शनात्। सर्व्वत्र नमःशब्दयोगाच्चतुर्थी। अनेन नमस्कारोभिहितः। यदा तु समन्तभद्रशब्दो रूढ्या बोधिसत्त्वविशेषे वर्तते तदापि पदव्याख्यानं पूर्ववदेव। अयन्तु विशेषः। विधूतकल्पनाजालत्वं बोधिसत्त्वभूम्यावरणप्रहाणतो वेदितव्यं। गाम्भीर्यन्तु खड्गश्रावकाविषयत्वात्। औदार्यन्तु दर्शभूमीश्वरबोधिसत्त्वमाहात्म्यातिशयतः। कायत्रयन्तु बोधिसत्त्वानामप्यस्ति प्रकर्षनिष्ठागमनात्तु भगवतां व्यवस्थाप्यते। देशना च प्रसिद्धैव तेषां॥ (१)॥

### ख. शास्त्रारम्भप्रयोजनम्

श्रोतृदोषबाहुल्याच्छास्त्रेण परोपकारमपश्यन् सूक्ताभ्यासभावितचित्ततामेवात्मनः शास्त्रारम्भकारणन्दर्शयन् वक्रोक्त्या दोषतापनयनेन शास्त्रे श्रोतृन् प्रवर्तयितुम(ा) ह।

---

७ शास्त्रादावविघ्नेन ] स्तुत्या पुण्योपचयात्। ७ श्रोतृजनानुग्रहार्थश्च ] व्याख्यातुश्चेति परार्थदर्शनात्। ११ विधूतं ] सर्व्वावरणविगमात्। १३ उक्तः ] पूजेयं नमः शब्दात्प्रणामतः शिष्टैश्च तेश्च। तच्च स्वपरार्थतदुभयसम्पत्तिस्ततः अवृत्तिहानिगाम्भीर्य्यौदार्यविशेषैस्त्रिभिः स्वार्थ उक्तः। १९ परार्थसम्पदभिहिता ] तदर्थिनां यथा। २३ नमःशब्दयोगाच्चतुर्थी ] अकारान्तः सकारान्तस्तृतीयार्थ इत्यन्ये। जनकायः।